नेयः सहि नाद्वितोयः। इति नैषधं ॥

अद्वैतः, त्रि, ( द्विधाभेदमितः प्राप्तः। द्वित + स्वार्थे अण् न द्वैतः। द्वितीयरहितः।) एकः। यथा,— यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा। इति श्रीचैतन्यचरितामृतं ॥

अद्वैतः, पुं, (द्विधाभेदमितः प्राप्तः तृतीयातत्, प्रज्ञादित्वात् स्वार्थे अण् ततोभिन्नः नञ्समासः।) द्वैतरहितः विष्णुः। यथा,—

"विष्णुमानन्दमद्वैतं विज्ञानं सर्व्वगं प्रभुं।
प्रणमामि सदा भक्त्या चेतसा हृदयालयं ॥"

इति गारुड़े २३८ अध्यायः ॥ * ॥ शिवावतारविशेषः। यथा,—

"नित्यानन्दो भक्तरूपो व्रजे यः श्रीहलायुधः।
भक्तावतार आचार्य्योऽद्वैतो यः श्रीसदाशिवः॥*॥"

तत्पित्रादिविवरणं यथा,—

"महादेवस्य मित्रं यः कुवेरो गुह्यकेश्वरः।
कुवेरपण्डितः सोऽद्य जनकोऽस्य विदांवरः ॥
पुरा कुवेरः कैलासे सिध्यसाध्यनिषेविते।
जजाप परमं मन्त्रं शैवं श्रीशिववल्लभः ॥
ततो दयालुर्भगवान् वरं वृणिवति सोऽब्रवीत्।
ततः कुवेरो वरयामास त्वं मे सुतो भव ॥
प्रार्थितस्तेन देवेशो वरदेशः सदाशिवः।
जन्मजन्मान्तरे पुत्त्र प्राप्स्यामि पुत्त्रतां तव ॥
इति प्राप्य वरं कष्टं कियन्तं कालमास्थितः।
कार्य्यादीशवशात् सोऽद्याद्वैतस्य जनकोऽभवत् ॥
योगमाया भगवती गृहिणी तस्य साम्प्रतं।
सीतारूपेणावतीर्णा श्रीनाम्नी तत्प्रकाशतः ॥
तस्य पुत्त्रोऽच्युतानन्दः क्वच चैतन्यवल्लभः।
श्रीमत्पण्डितगोस्वामिशिष्यप्रिय इति श्रुतं ॥
यः कार्त्तिकेयः प्रागासीदिति जल्पन्ति केचन"।

इति गौरगणोद्देशदीपिका ॥

अद्वैतवादी, [ न् ] त्रि, ( अद्वैतं "चिदेव सत्यं नान्यत् किञ्चिन" इति वदति, अद्वैत + वद + णिनि उपपदसमासः।) एकब्रह्मवादी। तस्य मतं यथा,— ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितं। यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति। तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति प्रकृतिर्जीवस्यापि पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सद्वस्तु नास्ति। अत्र प्रमाणं शारीरिकसूत्रस्य शङ्कराचार्य्यकृतभाष्यतट्टीकाकल्पतरुभाषरत्नप्रभादि ॥

अधः [ स् ] व्य, (अधरस्य अधादेशः ततः असिच्।) तलं। नीचं। अधोभागः। यथा,—

"लोकानुपर्य्युपर्य्यास्तेऽधोऽधोऽध्यधि च माधवः"।

इति वोपदेवः ॥ पातालं। योनिः। इति त्रिकाण्डशेषः ॥

अधःपुष्पी, स्त्री, ( अधः अधोमुखं पुष्पं यस्याः। अधस् + पुष्प + ङीप्।) गोजिह्वा। इति राजनिर्घण्टः ॥ तृणविशेषः। हेठाञ्जली। चोरखड़िका। भाँटुइ इति भाषा। तत्पर्य्यायः। अवाक्पुष्पी २ मधुल्या ३ अमरपुष्पिका ४। इति रत्नमाला ॥

अधःक्षिप्तः, त्रि, (अधः अधोभागे क्षिप्तः पतितः।) अधस्त्यक्तवस्तु। इति जटाधरः ॥

अधमः, त्रि, (अव पालने + अम, वस्य धादेशः।) न्यूनः। निन्दितः। अपकृष्टः। तत्पर्य्यायः। निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ अवमः ७ कुत्सितः ८ अवद्यः ९ कुपूयः १० खेटः ११ गर्ह्यः १२ अणकः १३। इत्यमरः ॥ रेपः १४ अरमः १५ आणकः १६ अनकः १७। इति तट्टीका ॥ (याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा। इति मेघदूते) ॥

अधमः, पुं, (अव पालने + अम, वस्य धादेशः।) उपपतिभेदः। तस्य लक्षणं। भयदयालज्जाशून्यत्वं। कामक्रीड़ाविषये कर्त्तव्याकर्त्तव्याविचारकत्वञ्च। इति रसमञ्जरी ॥

अधमभृतकः, त्रि, (अधम + भृ + क्त + स्वार्थे कन्।) (अधमः। निकृष्टः। भृतकः। भृत्यः।) अधमभृत्यः। नीचदासः। दौवारिकभारवाहकादयः ॥

अधमर्णः, त्रि, ( अधम + ऋण ऋणविषये अवश्यदेयविषये अधमः निन्दितः राजदन्तादित्वात् परनिपातः। वा अधमं ऋणमवश्यदेयत्वेन विद्यते यस्य।) ऋणगृहीता। ऋणी। इत्यमरः ॥ खातक इति भाषा।

("अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।
दापयेत् धनिकस्यार्थमधमर्णात् विभावितं ॥
अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि।
अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्" ॥

इति मनुः।) ॥

अधमर्णिकः, त्रि, (अधममवश्यदेयत्वेन निन्दितं ऋणं। तदेव दातृत्वेन विद्यते अस्य। अधमर्ण + अत इनिठनाविति ठन्। तस्य इक।) अधमर्णः। यथा,—

"गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः।
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरं ॥"

इति मिताक्षरा ॥

( "यै यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं" ॥

इति मनुः।) ॥

अधमा, स्त्री, ( अधम + स्त्रियां टाप्।) स्वीयाद्यन्तर्गतनायिकाभेदः। अस्या लक्षणं। हितकारिप्रियतमे अहितकारित्वं। अस्याः क्रिया अधमा। अस्या निष्कारणकोपत्वात् चण्डीति नाम। इति रसमञ्जरी ॥

अधमाङ्गं, क्ली, ( अधमम् अङ्गं कर्म्मधारयः।) पादः। चरणः। इति शब्दचन्द्रिका ॥

अधरं, क्ली पुं, (न ध्रियते कामुकस्य धैर्य्यं न तिष्ठति यत्र, न + धृ + पुंसि संज्ञायां घः प्रायेणेति अधिकरणे घः।) स्मरागारं। रतिगृहं। योनिरिति यावत्। इति शब्दरत्नावली त्रिकाण्डशेषश्च ॥

अधरः, पुं, (न ध्रियतेऽसौ धृ + अच् ततो नञ्समासः।) मुखावयवविशेषः। नावेर ठोँट। इति भाषा। ओष्ठः। उपर ठोँट। इति भाषा। तयोः पर्य्यायः। रदनच्छदः २ दशनवासः ३। इत्यमरः ॥ परन्तु द्वयोरपि ओष्ठाधरप्रयोगः यथा। रदनच्छदौ दशनवाससी उभयत्र वर्त्तेते तथा ओष्ठाधरावपि उभयत्रेति नयनानन्दः ॥ रायमुकुटोऽप्याह उपरिवर्त्ती अधोवर्त्ती च ओष्ठः अधरोऽप्येवं। पुरुषस्य रक्ताधरः प्रशस्तः। यथा,—

"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च।
तालुकोऽधरजिह्वा च सप्त रक्तं प्रशस्यते ॥"

स्त्रियास्तु यथा,—

"पाटलावर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः।
सीमन्तिनीनामधरो राज्ञां चैव प्रियो भवेत् ॥
श्यामः स्थूलोऽधरोष्ठः स्यात् वैधव्यकलहप्रदः।
मसृणो मत्तकाशिन्याश्चोत्तरोष्ठः सुभोगदः ॥"

इति सामुद्रकं ॥

अधरः, त्रि, (न धरः नञ्समासः। नीचः।) अधः। तलं। हीनः। अपकृष्टः। इति मेदिनी ॥ हीनवादी। इति हेमचन्द्रः ॥ ( यथा शाकुन्तले। पिबसि रतिसर्व्वस्वमधरं।) ॥

अधरतः, व्य, [स्] (अधर + तसिल् प्रथमापञ्चमीसप्तम्यर्थवृत्तौ।) अधस्तात्। अधोभागः। इति हलायुधः ॥

अधरमधु, क्ली, (अधरस्य मधु षष्ठीतत्।) वक्त्रासवः। अधरामृतं। अधररसः। इति त्रिकाण्डशेषः ॥

अधरस्तात् व्य, अधरतः। इति हलायुधः ॥

अधरस्मात्, व्य, (अधर + अस्ताति विकल्पे अधरस्य अधादेशः।) अधस्तात्। अधरात्। दिग्वाचकशब्दात् दिग्देशकालवाच्ये प्रथमापञ्चमीसप्तमीनां स्थाने तात् प्रत्ययोभवति। इति व्याकरणं ॥

अधरा, स्त्री, ( न धरा नञ्समासः।) अधोदिक्। इति व्याकरणं ॥ नीचा। यथा। अधराथ कृता ययैव सा। इति नैषधं ॥

अधरात्, व्य, अधरतः। अधरेण। अधरस्तात्। इत्यमरटीका ॥

अधरामृतं, क्ली, ( अधरस्य अमृतम्।) अधरसुधा। यथा,—

"सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निं।
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

अधरीणः, त्रि, ( अधरःकृतः तिरस्कृतः अधर + ख तस्य ईन।) धिक्कृतः। तिरस्कृतः। इति जटाधरः ॥

अधरेण, व्य, (अधरे देशे अधरस्यां दिशि वा अधर + एनप्।) अधोदिग्देशकालः। अधोदिक्देशकाले। इति व्याकरणं ॥

अधरेद्युः, [ स् ] व्य, ( अधरे परे दिवसे अधर + एद्युस्।) अधरदिवसः। परदिनं। इति शब्दरत्नावली ॥

अधर्म्मः, पुं, ( ध्रियतेऽनेन धृ + मनिन् ततो नञ्समासः, नञत्र विरोधार्थः।) धर्म्मविरोधी। स तु ब्रह्मणः पृष्ठाज्जातः। इति श्रीभागवतं ॥ पापं।